শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী শঙ্করাচার্য ৱিরচিতম্

# ॥শ্রী গোৱিন্দাষ্টকম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রী গোৱিন্দাষ্টকম্ ॥

সত্যং জ্ঞানমনন্তং নিত্যমনাকাশং পরমাকাশং
গোষ্ঠপ্রাঙ্গণরিঙ্গণলোলমনাযাসং পরমাযাসম্।
মাযাকল্পিতনানাকারমনাকারং ভুৱনাকারং
ক্ষ্মামানাথমনাথং প্রণমত গোৱিন্দং পরমানন্দম্॥ ১ ॥

মৃতস্নামতসীহেতি যশোদাতাডনশৈশৱ সন্ত্রাসং
ৱ্যাদিতৱক্ত্রালোকিতলোকালোকচতুর্দশলোকালিম্।
লোকত্রযপুরমূলস্তম্ভং লোকালোকমনালোকং
লোকেশং পরমেশং প্রণমত গোৱিন্দং পরমানন্দম্ ॥ ২ ॥

ত্রৈৱিষ্টপরিপুৱীরঘ্নং ক্ষিতিভারঘ্নং ভৱরোগঘ্নং
কৈৱল্যং নৱনীতাহারমনাহারং ভুৱনাহারম্।
ৱৈমল্যস্ফুটচেতোৱৃত্তিৱিশেষাভাসমনাভাসম্
শৈৱং কেৱলশান্তং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৩ ॥

গোপালং ভূলীলাৱিগ্রহগোপালং কুলগোপালং
গোপীখেলনগোৱর্ধনধৃতিলীলালালিতগোপালম্।
গোভির্নিগদিত গোৱিন্দস্ফুটনামানং বহুনামানং
গোপীগোচরদূরং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৪ ॥

গোপীমণ্ডলগোষ্ঠীভেদং ভেদাৱস্থমভেদাভং
শশ্বদ্গোখুরনির্ধূতোতকৃতধূলীধূসরসৌভাগ্যম্।
শ্রদ্ধাভক্তিগৃহীতানন্দমচিন্ত্যং চিন্তিতসদ্ভাৱং
চিন্তামণিমহিমানং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৫ ॥

স্নানৱ্যাকুলযোষিদ্বস্ত্রমুপাদাযাগমুপারূঢং
ৱ্যাদিতসন্তীরথ দিগ্বস্ত্রা দাতুমুপাকর্ষন্তম্ তাঃ।
নির্ধূতদ্ৱযশোকৱিমোহং বুদ্ধং বুদ্ধেরন্তস্থং
সত্তামাত্রশরীরং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৬ ॥

www.prapatti.com

কান্তং কারণকারণমাদিমনাদিং কালমনাভাসং
কালিন্দীগতকালিযশিরসি মুহুর্নৃত্যন্তং সুনৃত্যন্তম্।
কালং কালকলাতীতং কলিতাশেষং কলিদোষঘ্নং
কালত্রযগতিহেতুং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৭॥

ৱৃন্দাৱনভুৱি ৱৃন্দারকগণৱৃন্দারাধ্যং ৱন্দেহং
কুন্দাভামলমন্দস্মেরসুধানন্দং সুহৃদানন্দম্।
ৱন্দ্যাশেষমহামুনিমানসৱন্দ্যানন্দপদদ্বন্দ্বং
ৱন্দ্যাশেষগুণাব্ধিং প্রণমত গোৱিন্দং পরমানন্দম্॥ ৮॥

গোৱিন্দাষ্টকমেতদধীতে গোৱিন্দার্পিতচেতা যো
গোৱিন্দাচ্যুত মাধৱ ৱিষ্ণো গোকুলনাযক কৃষ্ণেতি।
গোৱিন্দাঙ্ঘ্রিসরোজধ্যানসুধাজলধৌতসমস্তাঘো
গোৱিন্দং পরমানন্দামৃতমন্তস্স্থং স সমভ্যেতি॥ ৯॥

॥ইতি শ্ৰী গোৱিন্দাষ্টকম্ সমাপ্তম্॥

www.prapatti.com